# पञ्चममनेकार्थकाण्डम्

| | | |
|---|---|---|
| | एकोऽर्थो[a] बहुभिः शब्दैः कथितः कथ्यतेऽधुना । | |
| | एकस्यैव तु शब्दस्य बहुष्वर्थेषु वर्तनम् ॥७८७॥ | |
| (1) Shiva. | रुद्रे[1]ऽपि **खण्डपरशुर्**वैश्रवणे[1]ऽप्ये**ककुण्डलः** प्रोक्तः । | (1) Kubera. |
| (1) Door, gate. | द्वारे[1]ऽपि **प्रतिहारः**[b] प्राकाराग्रे[c][1]ऽपि **कपिशीर्षम्** ॥७८८॥ | (1) The coping of a wall. |
| (1) Enough. | पर्याप्ते[1]ऽपि **कृतं** स्यादाहवनीयादिषु[1] त्रिषु **त्रेता** । | (1) The three sacred fires. |
| (1) Doubt. | सन्देहे[1]ऽपि **द्वापरमाहुः** कलहे[1]ऽपि **कलिशब्दम्** ॥७८९॥ | (1) War, battle. |
| (1) An army. | सेनायाम[1]पि **कटकं** **प्राणिद्यूतं** वदन्ति युद्धे[1]ऽपि । | (1) War. |
| (1) Demons. | रक्षस्य[1]पि **पुण्यजनं** मृद्भाण्डे[1]ऽप्यु**ष्ट्रिका**मार्याः ॥७९०॥ | (1) An earthen vessel. |
| (1) Silver. | **श्वेतं** रजते[1]ऽप्युक्तं **रजतं** हारे[1] शरे[1]ऽपि **किशारुः** । | (1) Necklace.<br>(1) An arrow. |
| (1) Hypocrisy. | दम्भे[1]ऽपि **गह्वरं** स्यादुपह्वरं सन्निधाने[1]ऽपि ॥७९१॥ | (1) Vicinity. |
| (1) An eyelid. | नयनच्छदे[1]ऽपि **वर्त्म** **प्रतिग्रहः** सैन्यपृष्ठभागे[1]ऽपि । | (1) The rear of an army. |
| (1) Phlegm. | श्लेष्मण्य[1]पि **खेटः** स्या**ज्जामिः** कुलबालिकायां[1] च ॥७९२॥ | (1) A respectable woman. |
| (1) A little, the mere scent of a thing. | **गन्धो** लेशे[1]ऽप्युक्तः करुणाप्रतिपादने[1] **तपस्वी** च । | (1) Exciting pity, pitiable. |
| (1) The distance from the wrist to the tip of the little finger. | मणिबन्धकनिष्ठकयोर्मध्यविभागे[1]ऽपि **करभः** स्यात् ॥७९३॥ | |

a एकार्थो b प्रतीहारः c प्राकाराग्रेपि कीर्तितम् ।